## ४१ एकचत्वारिंश दशकः - प्रणामम्

देवि त्वदावास्य मिदं न किञ्चित् वस्तु त्वदन्यद्बहुधेव भासि ।
देवासुरा सृक्पनरादि रूपा विश्वात्मिके ते सततं नमोऽस्तु ॥ ४१-१॥

न जन्म ते कर्म च देवि लोक-क्षेमाय जन्मानि दधासि मातः ।
करोषि कर्माणि च निस्पृहा त्वं जगद्विधात्र्यै सततं नमस्ते ॥ ४१-२॥

तत्त्वत्पदं यद्ध्रुव मारुरुक्षुः पुमान् व्रती निश्चल देहचित्तः ।
करोति तीव्राणि तपांसि योगी तस्यै नमस्ते जगदम्बिकायै ॥ ४१-३॥

त्वदाज्ञया वात्यनिलोऽनलश्च ज्वलत्युदेति द्युमणिः शशी च ।
निजैर्निजैः कर्मभि रेव सर्वे त्वां पूजयन्ते वरदे नमस्ते ॥ ४१-४॥

भक्तिर्न वन्ध्या यत एव देवि रागादि रोगाभि भवाद्विमुक्ताः ।
मर्त्यादयस्त्वत्पद माप्नुवन्ति तस्यै नमस्ते भुवनेशि मातः ॥ ४१-५॥

सर्वात्मना यो भजते त्वदङ्घ्रिं माया तवामुष्य सुखं ददाति ।
दुःखं च सा त्वद्विमुखस्य देवि मायाधिनाथे सततं नमस्ते ॥ ४१-६॥

दुःखं न दुःखं न सुखं सुखं च त्वद्विस्मृति र्दुःख मसह्य भारम् ।
सुखं सदा त्वत्स्मरणं महेशि लोकाय शं देहि नमो नमस्ते ॥ ४१-७॥

पतन्तु ते देवि कृपाकटाक्षाः सर्वत्र भद्राणि भवन्तु नित्यम् ।
सर्वोऽपि मृत्यो रमृतत्वमेतु नश्यन्त्व भद्राणि शिवे नमस्ते ॥ ४१-८॥

नमो नमस्तेऽखिल शक्ति युक्ते नमो नमस्ते जगतां विधात्रि ।
नमो नमस्ते करुणार्द्र चित्ते नमो नमस्ते सकलार्ति हन्त्रि ॥ ४१-९॥

दुर्गे महालक्ष्मि नमो नमस्ते भद्रे महावाणि नमो नमस्ते ।
कल्याणि मातङ्गि रमे भवानि सर्वस्वरूपे सततं नमस्ते ॥ ४१-१०॥

यत् किञ्चिदज्ञातवतेह देवी-नारायणीयं रचितं मयेदम् ।
अभद्रनाशाय सतां हिताय तव प्रसादाय च नित्यमस्तु ॥ ४१-११॥